श्री सायि सहस्रनामावळि

1। ॐ अखंडसच्चिदानंदाय नमः

2। ॐ अखिलजीववत्सलाय नमः

3। ॐ अखिलवस्तुविस्ताराय नमः

4। ॐ अक्बराज्ञाभिवंदिताय नमः

5। ॐ अखिलचेतनाविष्टाय नमः

6। ॐ अखिलवेदसंप्रदाय नमः

7। ॐ अखिलांडेशरूपोऽपि पिंडे पिंडे प्रतिष्ठिताय नमः

8। ॐ अग्रण्ये नमः

9। ॐ अग्र्यभूम्ने नमः

10। ॐ अगणितगुणाय नमः

11। ॐ अघौघसन्निवर्तिने नमः

12। ॐ अचिंत्यमहिम्ने नमः

13। ॐ अचलाय नमः

14। ॐ अच्युताय नमः

15। ॐ अजाय नमः

16। ॐ अजातशत्रवे नमः

17। ॐ अज्ञानतिमिरांधानां चक्षुरुन्मीलनक्षमाय नमः

18। ॐ आजन्मस्थितिनाशाय नमः

19। ॐ अणिमादिविभूषिताय नमः

20। ॐ अत्युन्नतधुनीज्वालामाज्ञयैवनिवर्तकाय नमः

21। ॐ अत्युल्बणमहासर्पादपिभक्तसुरक्षित्रे नमः

22। ॐ अतितीव्रतपस्तप्ताय नमः

23। ॐ अतिनम्रस्वभावकाय नमः

24। ॐ अन्नदानसदानिष्ठाय नमः

25। ॐ अतिथिभुक्तशेषभुजे नमः

26। ॐ अदृश्यलोकसंचारिणे नमः

27। ॐ अदृष्टपूर्वदर्शित्रे नमः

28। ॐ अद्वैतवस्तुतत्त्वज्ञाय नमः

29। ॐ अद्वैतानंदवर्षकाय नमः

30। ॐ अद्भुतानंतशक्तये नमः

31। ॐ अधिष्ठानाय नमः

32। ॐ अधोक्षजाय नमः

33। ॐ अधर्मतरुच्छेत्रे नमः

34। ॐ अधियज्ञाय नमः

35। ॐ अधिभूताय नमः

36। ॐ अधिदैवाय नमः

37। ॐ अध्यक्षाय नमः

38। ॐ अनघाय नमः

39। ॐ अनंतनाम्ने नमः

40। ॐ अनंतगुणभूषणाय नमः

41। ॐ अनंतमूर्तये नमः

42। ॐ अनंताय नमः

43। ॐ अनंतशक्तिसंयुताय नमः

44। ॐ अनंताश्चर्यवीर्याय नमः

45। ॐ अनह्लक अतिमानिताय नमः

46। ॐ अनवरतसमाधिस्थाय नमः

47। ॐ अनाथपरिरक्षकाय नमः

48। ॐ अनन्यप्रेमसंहृष्टगुरुपादविलीनहृदे नमः

49। ॐ अनाधृताष्टसिद्धये नमः

50। ॐ अनामयपदप्रदाय नमः

51। ॐ अनादिमत्परब्रह्मणे नमः

52। ॐ अनाहतदिवाकराय नमः

53। ॐ अनिर्देश्यवपुषे नमः

54। ॐ अनिमेषेक्षितप्रजाय नमः

55। ॐ अनुग्रहार्थमूर्तये नमः

56। ॐ अनुवर्तितवेंकूशाय नमः

57। ॐ अनेकदिव्यमूर्तये नमः

58। ॐ अनेकाद्भुतदर्शनाय नमः

59। ॐ अनेकजन्मजंपापंस्मृतिमात्रेणहारकाय नमः

60। ॐ अनेकजन्मवृत्तांतंसविस्तारमुदीरयते नमः

61। ॐ अनेकजन्मसंप्राप्तकर्मबंधविदारणाय नमः

62। ॐ अनेकजन्मसंसिद्धशक्तिज्ञानस्वरूपवते नमः

63। ॐ अंतर्बहिश्चसर्वत्रायव्याप्ताखिलचराचराय नमः

64। ॐ अंतर्हृदय आकाशाय नमः

65। ॐ अंतकालेऽपि रक्षकाय नमः

66। ॐ अंतर्यामिणे नमः

67। ॐ अंतरात्मने नमः

68। ॐ अन्नवस्त्रेप्सितप्रदाय नमः

69। ॐ अपराजितशक्तये नमः

70। ॐ अपरिग्रहभूषिताय नमः

71। ॐ अपवर्गप्रदात्रे नमः

72। ॐ अपवर्गमयाय नमः

73। ॐ अपांतरात्मरूपेण स्रष्टुरिष्टप्रवर्तकाय नमः

74। ॐ अपावृतकृपागाराय नमः

75। ॐ अपारज्ञानशक्तिमते नमः

76। ॐ अपार्थिवदेहस्थाय नमः

77। ॐ अपांपुष्पनिबोधकाय नमः

78। ॐ अप्रपंचाय नमः

79। ॐ अप्रमत्ताय नमः

80। ॐ अप्रमेयगुणाकाराय नमः

81। ॐ अप्राकृतवपुषे नमः

82। ॐ अप्राकृतपराक्रमाय नमः

83। ॐ अप्रार्थितेष्टदात्रे नमः

84। ॐ अब्दुल्लादि परागतये नमः

85। ॐ अभयं सर्वभूतेभ्यो ददामीति व्रतिने नमः

86। ॐ अभिमानातिदूराय नमः

87। ॐ अभिषेकचमत्कृतये नमः

88। ॐ अभीष्टवरवर्षिणे नमः

89। ॐ अभीक्ष्णदिव्यशक्तिभृते नमः

90। ॐ अभेदानंदसंधात्रे नमः

91। ॐ अमर्त्याय नमः

92। ॐ अमृतवाक्सृतये नमः

93। ॐ अरविंददळाक्षाय नमः

94। ॐ अमितपराक्रमाय नमः

95। ॐ अरिषड्वर्गनाशिने नमः

96। ॐ अरिष्टघ्नाय नमः

97। ॐ अर्हसत्तमाय नमः

98। ॐ अलभ्यलाभसंधात्रे नमः

99। ॐ अल्पदानसुतोषिताय नमः

100। ॐ अल्लानामसदावक्त्रे नमः

101। ॐ अलंबुध्यास्वलंकृताय नमः

102। ॐ अवतारितसर्वेशाय नमः

103। ॐ अवधीरितवैभवाय नमः

104। ॐ अवलंब्यस्वपदाब्जाय नमः

105। ॐ अवलियेतिविश्रुताय नमः

106। ॐ अवधूताखिलोपाधये नमः

107। ॐ अविशिष्टाय नमः

108। ॐ अवशिष्टस्वकार्यार्थेत्यक्तदेहंप्रविष्टवते नमः

109। ॐ अवाक्पाणिपादोरवे नमः

110। ॐ अवाङ्मानसगोचराय नमः

111। ॐ अवाप्तसर्वकामोऽपि कर्मण्येव प्रतिष्टिताय नमः

112। ॐ अविच्छिन्नाग्निहोत्राय नमः

113। ॐ अविच्छिन्नसुखप्रदाय नमः

114। ॐ अवेक्षितदिगंतस्थप्रजापाननिष्ठिताय नमः

115। ॐ अव्याजकरुणासिंधवे नमः

116। ॐ अव्याहतेष्टिदेशगाय नमः

117। ॐ अव्याहृतोपदेशाय नमः

118। ॐ अव्याहतसुखप्रदाय नमः

119। ॐ अशक्यशक्यकर्त्रे नमः

120। ॐ अशुभाशयशुद्धिकृते नमः

121। ॐ अशेषभूतहृत्स्थाणवे नमः

122। ॐ अशोकमोहशृंखलाय नमः

123। ॐ अष्टैश्वर्ययुतत्यागिने नमः

124। ॐ अष्टसिद्धिपराङ्मुखाय नमः

125। ॐ असंयोगयुक्तात्मने नमः

126। ॐ असंगदृढशस्त्रभृते नमः

127। ॐ असंख्येयावतारेषु ऋणानुबंधिरक्षिताय नमः

128। ॐ अहंब्रह्मस्थितप्रज्ञाय नमः

129। ॐ अहंभावविवर्जिताय नमः

130। ॐ अहं त्वं च त्वमेवाहमिति तत्त्वप्रबोधकाय नमः

131। ॐ अहेतुककृपासिंधवे नमः

132। ॐ अहिंसानिरताय नमः

133। ॐ अक्षीणसौहृदाय नमः

134। ॐ अक्षयाय नमः

135। ॐ अक्षयसुखप्रदाय नमः

136। ॐ अक्षरादपि कूटस्थादुत्तम पुरुषोत्तमाय नमः

137। ॐ आखुवाहनमूर्तये नमः

138। ॐ आगमाद्यंतसन्नुताय नमः

139। ॐ आगमातीतसद्भावाय नमः

140। ॐ आचार्यपरमाय नमः

141। ॐ आत्मानुभवसंतुष्टाय नमः

142। ॐ आत्मविद्याविशारदाय नमः

143। ॐ आत्मानंदप्रकाशाय नमः

144। ॐ आत्मैवपरमात्मदृशे नमः

145। ॐ आत्मैकसर्वभूतात्मने नमः

146। ॐ आत्मारामाय नमः

147। ॐ आत्मवते नमः

148। ॐ आदित्यमध्यवर्तिने नमः

149। ॐ आदिमध्यांतवर्जिताय नमः

150। ॐ आनंदपरमानंदाय नमः

151। ॐ आनंदप्रदाय नमः

152। ॐ आनाकमादृताज्ञाय नमः

153। ॐ आनतावननिवृतये नमः

154। ॐ आपदामपहर्त्रे नमः

155। ॐ आपद्बांधवाय नमः

156। ॐ आफ्रिकागतवैद्याय परमानंददायकाय नमः

157। ॐ आयुरारोग्यदात्रे नमः

158। ॐ आर्तत्राणपरायणाय नमः

159। ॐ आरोपणापवादैश्च मायायोगवियोगकृते नमः

160। ॐ आविष्कृत तिरोधत्त बहुरूपविडंबनाय नमः

161। ॐ आर्द्रचित्तेन भक्तानां सदानुग्रहवर्षकाय नमः

162। ॐ आशापाशविमुक्ताय नमः

163। ॐ आशापाशविमोचकाय नमः

164। ॐ इच्छाधीनजगत्सर्वाय नमः

165। ॐ इच्छाधीनवपुषे नमः

166। ॐ इष्टेप्सितार्थदात्रे नमः

167। ॐ इच्छामोहनिवर्तकाय नमः

168। ॐ इच्छोत्थदुःखसंछेत्रे नमः

169। ॐ इंद्रियारातिदर्पघ्ने नमः

170। ॐ इंदिरारमणाह्लादिनामसाहस्रपूतहृदे नमः

171। ॐ इंदीवरदळज्योतिर्लोचनालंकृताननाय नमः

172। ॐ इंदुशीतलभाषिणे नमः

173। ॐ इंदुवत्प्रियदर्शनाय नमः

174। ॐ इष्टापूर्तशतैर्लब्धाय नमः

175। ॐ इष्टदैवस्वरूपधृते नमः

176। ॐ इष्टिकादानसुप्रीताय नमः

177। ॐ इष्टिकालयरक्षिताय नमः

178। ॐ ईशासक्तमनोबुद्धये नमः

179। ॐ ईशाराधनतत्पराय नमः

180। ॐ ईशिताखिलदेवाय नमः

181। ॐ ईशावास्यार्थसूचकाय नमः

182। ॐ उच्चारणाधृते भक्तहृदांत उपदेशकाय नमः

183। ॐ उत्तमोत्तममार्गिणे नमः

184। ॐ उत्तमोत्तारकर्मकृते नमः

185। ॐ उदासीनवदासीनाय नमः

186। ॐ उद्धरामीत्युदीरकाय नमः

187। ॐ उद्धवाय मया प्रोक्तं भागवतमिति ब्रुवते नमः

188। ॐ उन्मत्तश्चाभिगोप्त्रे नमः

189। ॐ उन्मत्तवेषनामधृते नमः

190। ॐ उपद्रवनिवारिणे नमः

191। ॐ उपांशुजपबोधकाय नमः

192। ॐ उमेशामेशयुक्तात्मने नमः

193। ॐ ऊर्जितभक्तिलक्षणाय नमः

194। ॐ ऊर्जितवाक्प्रदात्रे नमः

195। ॐ ऊर्ध्वरेतसे नमः

196। ॐ ऊर्ध्वमूलमधःशाखामश्वत्थं भस्मसात्कराय नमः

197। ॐ ऊर्ध्वगतिविधात्रे नमः

198। ॐ ऊर्ध्वबद्धद्विकेतनाय नमः

199। ॐ ऋजवे नमः

200। ॐ ऋतंबरप्रज्ञाय नमः

201। ॐ ऋणक्लिष्टधनप्रदाय नमः

202। ॐ ऋणानुबद्धजंतुनां ऋणमुक्त्यै फलप्रदाय नमः

203। ॐ एकाकिने नमः

204। ॐ एकभक्तये नमः

205। ॐ एकवाक्कायमानसाय नमः

206। ॐ एकादश्यां स्वभक्तानां स्वतनोकृतनिष्कृतये नमः

207। ॐ एकाक्षरपरज्ञानिने नमः

208। ॐ एकात्मा सर्वदेशदृशे नमः

209। ॐ एकेश्वरप्रतीतये नमः

210। ॐ एकरीत्यादृताखिलाय नमः

211। ॐ ऐक्यानंदगतद्वंद्वाय नमः

212। ॐ ऐक्यानंदविधायकाय नमः

213। ॐ ऐक्यकृते नमः

214। ॐ ऐक्यभूतात्मने नमः

215। ॐ ऐहिकामुष्मिकप्रदाय नमः

216। ॐ ओंकारादराय नमः

217। ॐ ओजस्विने नमः

218। ॐ औषधीकृतभस्मदाय नमः

219। ॐ कथाकीर्तनपद्धत्यां नारदानुष्ठितं स्तुवते नमः

220। ॐ कपर्दे क्लेशनाशिने नमः

221। ॐ कबीर्दासावतारकाय नमः

222। ॐ कपर्दे पुत्ररक्षार्थमनुभूत तदामयाय नमः

223। ॐ कमलाश्लिष्टपादाब्जाय नमः

224। ॐ कमलायतलोचनाय नमः

225। ॐ कंदर्पदर्पविध्वंसिने नमः

226। ॐ कमनीयगुणालयाय नमः

227। ॐ कर्ताऽकर्ता अन्यथाकर्त्रे नमः

228। ॐ कर्मयुक्तोप्यकर्मकृते नमः

229। ॐ कर्मकृते नमः

230। ॐ कर्मनिर्मुक्ताय नमः

231। ॐ कर्माऽकर्मविचक्षणाय नमः

232। ॐ कर्मबीजक्षयंकर्त्रे नमः

233। ॐ कर्मनिर्मूलनक्षमाय नमः

234। ॐ कर्मव्याधिव्यपोहिने नमः

235। ॐ कर्मबंधविनाशकाय नमः

236। ॐ कलिमलापहारिणे नमः

237। ॐ कलौ प्रत्यक्षदैवताय नमः

238। ॐ कलियुगावताराय नमः

239। ॐ कल्युत्थभवभंजनाय नमः

240। ॐ कळ्याणानंतनाम्ने नमः

241। ॐ कळ्याणगुणभूषणाय नमः

242। ॐ कविदासगणुत्रात्रे नमः

243। ॐ कष्टनाशकरौषधाय नमः

244। ॐ काकादीक्षित रक्षायां धुरीणो अहमितीरकाय नमः

245। ॐ कानाभिलादपि त्रात्रे नमः

246। ॐ कानने पानदानकृते नमः

247। ॐ कामजिते नमः

248। ॐ कामरूपिणे नमः

249। ॐ कामसंकल्पवर्जिताय नमः

250। ॐ कामितार्थप्रदात्रे नमः

251। ॐ कामादिशत्रुनाशनाय नमः

252। ॐ काम्यकर्मसुसन्यस्ताय नमः

253। ॐ कामेराशक्तिनाशकाय नमः

254। ॐ कालाय नमः

255। ॐ कालकालाय नमः

256। ॐ कालातीताय नमः

257। ॐ कालकृते नमः

258। ॐ कालदर्पविनाशिने नमः

259। ॐ कालरातर्जनक्षमाय नमः

260। ॐ कालशुनकदत्तान्नं ज्वरं हरेदिति ब्रुवते नमः

261। ॐ कालाग्निसदृशक्रोधाय नमः

262। ॐ काशीरामसुरक्षकाय नमः

263। ॐ कीर्तिव्याप्तदिगंताय नमः

264। ॐ कुप्रीवीतकलेबराय नमः

265। ॐ कुंबाराग्निशिशुत्रात्रे नमः

266। ॐ कुष्ठरोगनिवारकाय नमः

267। ॐ कूटस्थाय नमः

268। ॐ कृतज्ञाय नमः

269। ॐ कृत्स्नक्षेत्रप्रकाशकाय नमः

270। ॐ कृत्स्नज्ञाय नमः

271। ॐ कृपापूर्णाय नमः

272। ॐ कृपयापालितार्भकाय नमः

273। ॐ कृष्णरामशिवात्रेयमारुत्यादिस्वरूपधृते नमः

274। ॐ केवलात्मानुभूतये नमः

275। ॐ कैवल्यपददायकाय नमः

276। ॐ कोविदाय नमः

277। ॐ कोमलांगाय नमः

278। ॐ कोपव्याजशुभप्रदाय नमः

279। ॐ कोऽहमिति दिवानक्तं विचारमनुशासकाय नमः

280। ॐ क्लिष्टरक्षाधुरीणाय नमः

281। ॐ क्रोधजिते नमः

282। ॐ क्लेशनाशनाय नमः

283। ॐ गगनसौक्ष्म्यविस्ताराय नमः

284। ॐ गंभीरमधुरस्वनाय नमः

285। ॐ गंगातीरनिवासिने नमः

286। ॐ गंगोत्पत्तिपदांबुजाय नमः

287। ॐ गंगागिरिरितिख्यात यतिश्रेष्ठेन संस्तुताय नमः

288। ॐ गंधपुष्पाक्षतौ पूज्याय नमः

289। ॐ गतिविदे नमः

290। ॐ गतिसूचकाय नमः

291। ॐ गह्वरेष्ठपुराणाय नमः

292। ॐ गर्वमात्सर्यवर्जिताय नमः

293। ॐ गाननृत्यविनोदाय नमः

294। ॐ गालवण्कर्वरप्रदाय नमः

295। ॐ गिरीशसदृशत्यागिने नमः

296। ॐ गीताचार्याय नमः

297। ॐ गीताद्भुतार्थवक्त्रे नमः

298। ॐ गीतारहस्यसंप्रदाय नमः

299। ॐ गीताज्ञानमयाय नमः

300। ॐ गीतापूर्णोपदेशकाय नमः

301। ॐ गुणातीताय नमः

302। ॐ गुणात्मने नमः

303। ॐ गुणदोषविवर्जिताय नमः

304। ॐ गुणागुणेषु वर्तंत इत्यनासक्ति सुस्थिराय नमः

305। ॐ गुप्ताय नमः

306। ॐ गुहाहिताय नमः

307। ॐ गूढाय नमः

308। ॐ गुप्तसर्वनिबोधकाय नमः

309। ॐ गुर्वंघ्रितीव्रभक्तिश्चेत्तदेवालमितीरयते नमः

310। ॐ गुरवे नमः

311। ॐ गुरुतमाय नमः

312। ॐ गुह्याय नमः

313। ॐ गुरुपादपरायणाय नमः

314। ॐ गुर्वीशांघ्रिसदाध्यात्रे नमः

315। ॐ गुरुसंतोषवर्धनाय नमः

316। ॐ गुरुप्रेमसमालब्धपरिपूर्णस्वरूपवते नमः

317। ॐ गुरूपासनसंसिद्धाय नमः

318। ॐ गुरुमार्गप्रवर्तकाय नमः

319। ॐ गुर्वात्मदेवताबुद्ध्या ब्रह्मानंदमयाय नमः

320। ॐ गुरोस्समाधिपार्श्वस्थनिंबच्छायानिवासकृते नमः

321। ॐ गुरुवेंकुश संप्राप्तवस्त्रेष्टिका सदाधृताय नमः

322। ॐ गुरुपरंपरादिष्टसर्वत्यागपरायणाय नमः

323। ॐ गुरुपरंपराप्राप्तसच्चिदानंदमूर्तिमते नमः

324। ॐ गृहहीनमहाराजाय नमः

325। ॐ गृहमेधिपराश्रयाय नमः

326। ॐ गोपींस्त्राता यथा कृष्ण नाच्ने कुलावनाय नमः

327। ॐ गोपालगुंडूरायादि पुत्रपौत्रादिवर्धनाय नमः

328। ॐ गोष्पदीकृतकष्टाब्धये नमः

329। ॐ गोदावरीतटागताय नमः

330। ॐ चतुर्भुजाय नमः

331। ॐ चतुर्बाहुनिवारितनृसंकटाय नमः

332। ॐ चमत्कारैः संक्लिष्टौर्भक्तिज्ञानविवर्धनाय नमः

333। ॐ चंदनालेपारुष्टानां दुष्टानां धर्षणक्षमाय नमः

334। ॐ चंदोर्करादि भक्तानां सदापालननिष्ठिताय नमः

335। ॐ चराचरपरिव्याप्ताय नमः

336। ॐ चर्मदाहेप्यविक्रियाय नमः

337। ॐ चांद्रायाख्य पाटेलार्थं चमत्कार सहायकृते नमः

338। ॐ चिंतामग्न परित्राणे तस्य सर्वभारं वहाय नमः

339। ॐ चित्रातिचित्रचारित्राय नमः

340। ॐ चिन्मयानंदाय नमः

341। ॐ चिरवासकृतैर्बंधैः शिर्डीग्रामं पुनर्गताय नमः

342। ॐ चोराद्याहृतवस्तूनिदत्तान्येवेतिहर्षिताय नमः

343। ॐ छिन्नसंशयाय नमः

344। ॐ छिन्नसंसारबंधनाय नमः

345। ॐ जगत्पित्रे नमः

346। ॐ जगन्मात्रे नमः

347। ॐ जगत्त्रात्रे नमः

348। ॐ जगद्धिताय नमः

349। ॐ जगत्स्रष्टाय नमः

350। ॐ जगत्साक्षिणे नमः

351। ॐ जगद्व्यापिने नमः

352। ॐ जगद्गुरवे नमः

353। ॐ जगत्प्रभवे नमः

354। ॐ जगन्नाथाय नमः

355। ॐ जगदेकदिवाकराय नमः

356। ॐ जगन्मोहचमत्काराय नमः

357। ॐ जगन्नाटकसूत्रधृते नमः

358। ॐ जगन्मंगळकर्त्रे नमः

359। ॐ जगन्मायेतिबोधकाय नमः

360। ॐ जडोन्मत्तपिशाचाभोप्यंतःसच्चित्सुखस्थिताय नमः

361। ॐ जन्मबंधविनिर्मुक्ताय नमः

362। ॐ जन्मसाफल्यमंत्रदाय नमः

363। ॐ जन्मजन्मांतरज्ञाय नमः

364। ॐ जन्मनाशरहस्यविदे नमः

365। ॐ जनजल्पमनाद्यत्य जपसिद्धि महाद्युतये नमः

366। ॐ जप्तनामसुसंतुष्टहरिप्रत्यक्षभाविताय नमः

367। ॐ जपप्रेरितभक्ताय नमः

368। ॐ जप्यनाम्ने नमः

369। ॐ जनेश्वराय नमः

370। ॐ जलहीनस्थले खिन्नभक्तार्थं जलसृष्टिकृते नमः

371। ॐ जवारालीति मौलानासेवने अक्लिष्टमानसाय नमः

372। ॐ जातग्रामाद्गुरोर्ग्रामं तस्मात्पूर्वस्थलं व्रजते नमः

373। ॐ जातिर्भेदमतैर्भेद इति भेदतिरस्कृताय नमः

374। ॐ जातिविद्याधनैश्चापि हीनानार्द्रहृदावनाय नमः

375। ॐ जांबूनदपरित्यागिने नमः

376। ॐ जागरूकावितप्रजाय नमः

377। ॐ जायापत्यगृहक्षेत्रस्वजनस्वार्थवर्जिताय नमः

378। ॐ जितद्वैतमहामोहाय नमः

379। ॐ जितक्रोधाय नमः

380। ॐ जितेंद्रियाय नमः

381। ॐ जितकंदर्पदर्पाय नमः

382। ॐ जितात्मने नमः

383। ॐ जितषड्रिपवे नमः

384। ॐ जीर्णहूणालयस्थाने पूर्वजन्मकृतं स्मरते नमः

385। ॐ जीर्णहूणालयं चाद्य सर्वमर्त्यालयंकराय नमः

386। ॐ जीर्णवस्त्रसमं मत्वा देहं त्यक्त्वा सुखं स्थिताय नमः

387। ॐ जीर्णवस्त्रसमं पश्यन् त्यक्त्वा देहं प्रविष्टवते नमः

388। ॐ जीवन्मुक्ताय नमः

389। ॐ जीवानां मुक्तिसद्गतिदायकाय नमः

390। ॐ ज्योतिश्शास्त्ररहस्यज्ञाय नमः

391। ॐ ज्योतिर्ज्ञानप्रदाय नमः

392। ॐ ज्योक्चसूर्यं दृशा पश्यते नमः

393। ॐ ज्ञानभास्करमूर्तिमते नमः

394। ॐ ज्ञातसर्वरहस्याय नमः

395। ॐ ज्ञातब्रह्मपरात्पराय नमः

396। ॐ ज्ञानभक्तिप्रदाय नमः

397। ॐ ज्ञानविज्ञाननिश्चयाय नमः

398। ॐ ज्ञानशक्तिसमारूढाय नमः

399। ॐ ज्ञानयोगव्यवस्थिताय नमः

400। ॐ ज्ञानाग्निदग्धकर्मणे नमः

401। ॐ ज्ञाननिर्धूतकल्मषाय नमः

402। ॐ ज्ञानवैराग्यसंधात्रे नमः

403। ॐ ज्ञानसंछिन्नसंशयाय नमः

404। ॐ ज्ञानापास्तमहामोहाय नमः

405। ॐ ज्ञानीत्यात्मैव निश्चयाय नमः

406। ॐ ज्ञानेश्वरीपठद्दैवप्रतिबंधनिवारकाय नमः

407। ॐ ज्ञानाय नमः

408। ॐ ज्ञेयाय नमः

409। ॐ ज्ञानगम्याय नमः

410। ॐ ज्ञातसर्व परं मताय नमः

411। ॐ ज्योतिषां प्रथमज्योतिषे नमः

412। ॐ ज्योतिर्हीनद्युतिप्रदाय नमः

413। ॐ तपस्संदीप्ततेजस्विने नमः

414। ॐ तप्तकांचनसन्निभाय नमः

415। ॐ तत्त्वज्ञानार्थदर्शिने नमः

416। ॐ तत्त्वमस्यादिलक्षिताय नमः

417। ॐ तत्त्वविदे नमः

418। ॐ तत्त्वमूर्तये नमः

419। ॐ तंद्रालस्यविवर्जिताय नमः

420। ॐ तत्त्वमालाधराय नमः

421। ॐ तत्त्वसारविशारदाय नमः

422। ॐ तर्जितांतकदूताय नमः

423। ॐ तमसः पराय नमः

424। ॐ तात्यागणपतिप्रेष्ठाय नमः

425। ॐ तात्यानूल्कर्गतिप्रदाय नमः

426। ॐ तारकब्रह्मनाम्ने नमः

427। ॐ तमोरजोविवर्जिताय नमः

428। ॐ तामरसदळाक्षाय नमः

429। ॐ ताराबाय्यासुरक्षाय नमः

430। ॐ तिलकपूजितांघ्रये नमः

431। ॐ तिर्यग्जंतुगतिप्रदाय नमः

432। ॐ तीर्थकृतनिवासाय नमः

433। ॐ तीर्थपादाय नमः

434। ॐ तीव्रभक्तिनृसिंहादिभक्तालीभूर्यनुग्रहाय नमः

435। ॐ तीव्रप्रेमविरागाप्तवेंकटेशकृपानिधये नमः

436। ॐ तुल्यप्रियाऽप्रियाय नमः

437। ॐ तुल्यनिंदात्मसंस्तुतये नमः

438। ॐ तुल्याधिकविहीनाय नमः

439। ॐ तुष्टसज्जनसंवृताय नमः

440। ॐ तृप्तात्मने नमः

441। ॐ तृषाहीनाय नमः

442। ॐ तृणीकृतजगद्वसवे नमः

443। ॐ तैलीकृतजलापूर्णदीपसंज्वलितालयाय नमः

444। ॐ त्रिकालज्ञाय नमः

445। ॐ त्रिमूर्तये नमः

446। ॐ त्रिगुणातीताय नमः

447। ॐ त्रियामायोगनिष्ठात्मा दशदिग्भक्तपालकाय नमः

448। ॐ त्रिवर्गमोक्षसंधात्रे नमः

449। ॐ त्रिपुटीरहितस्थितये नमः

450। ॐ त्रिलोकस्वेच्छसंचारिणे नमः

451। ॐ त्रैलोक्यतिमिरापहाय नमः

452। ॐ त्यक्तकर्मफलासंगाय नमः

453। ॐ त्यक्तभोगसदासुखिने नमः

454। ॐ त्यक्तदेहात्मबुद्धये नमः

455। ॐ त्यक्तसर्वपरिग्रहाय नमः

456। ॐ त्यक्त्वा मायामयं सर्वं स्वे महिम्नि सदास्थिताय नमः

457। ॐ दंडधृते नमः

458। ॐ दंडनार्हाणां दुष्टवृत्तेर्निवर्तकाय नमः

459। ॐ दंभदर्पातिदूराय नमः

460। ॐ दक्षिणामूर्तये नमः

461। ॐ दक्षिणादानकर्तृभ्यो दशधाप्रतिदायकाय नमः

462। ॐ दक्षिणाप्रार्थनाद्वारा शुभकृत्तत्त्वबोधकाय नमः

463। ॐ दयापराय नमः

464। ॐ दयासिंधवे नमः

465। ॐ दत्तात्रेयाय नमः

466। ॐ दरिद्रोऽयं धनीवेति भेदाचारविवर्जिताय नमः

467। ॐ दहराकाशभानवे नमः

468। ॐ दग्धहस्तार्भकावनाय नमः

469। ॐ दारिद्र्यदुःखभीतिघ्नाय नमः

470। ॐ दामोदरवरप्रदाय नमः

471। ॐ दानशौंडाय नमः

472। ॐ दांताय नमः

473। ॐ दानैश्चान्यान् वशं नयते नमः

474। ॐ दानमार्गस्खलत्पादनानाचांदोर्करावनाय नमः

475। ॐ दिव्यज्ञानप्रदाय नमः

476। ॐ दिव्यमंगळविग्रहाय नमः

477। ॐ दीनदयापराय नमः

478। ॐ दीर्घदृशे नमः

479। ॐ दीनवत्सलाय नमः

480। ॐ दुष्टानां दमने शक्ताय नमः

481। ॐ दुराधर्षतपोबलाय नमः

482। ॐ दुर्भिक्षोप्यन्नदात्रे नमः

483। ॐ दुरादृष्टविनाशकृते नमः

484। ॐ दुःखशोकभयद्वेषमोहाद्यशुभनाशकाय नमः

485। ॐ दुष्टनिग्रहशिष्टानुग्रहरूपमहाव्रताय नमः

486। ॐ दुष्टमूर्खजडादीनामप्रकाशस्वरूपवते नमः

487। ॐ दुष्टजंतुपरित्रात्रे नमः

488। ॐ दूरवर्तिसमस्तदृशे नमः

489। ॐ दृश्यं नश्यं न विश्वास्यमिति बुद्धि प्रबोधकाय नमः

490। ॐ दृश्यं सर्वं हि चैतन्यमित्यानंद प्रतिष्ठाय नमः

491। ॐ देहे विगलिताशाय नमः

492। ॐ देहयात्रार्थमन्नभुजे नमः

493। ॐ देहो गेहस्ततो मांतु निन्ये गुरुरितीरकाय नमः

494। ॐ देहात्मबुद्धिहीनाय नमः

495। ॐ देहमोहप्रभंजनाय नमः

496। ॐ देहो देवालयस्तस्मिन् देवं पश्येत्युदीरयते नमः

497। ॐ दैवीसंपत्प्रपूर्णाय नमः

498। ॐ देशोद्धारसहायकृते नमः

499। ॐ द्वंद्वमोहविनिर्मुक्ताय नमः

500। ॐ द्वंद्वातीतविमत्सराय नमः

501। ॐ द्वारकामायिवासिने नमः

502। ॐ द्वेषद्रोहविवर्जिताय नमः

503। ॐ द्वैताद्वैतविशिष्टादीन् काले स्थाने विबोधकाय नमः

504। ॐ धनहीनां धनाड्यां च समदृष्ट्यैव रक्षकाय नमः

505। ॐ धनदेनसमत्यागिने नमः

506। ॐ धरणीधरसन्निभाय नमः

507। ॐ धर्मज्ञाय नमः

508। ॐ धर्मसेतवे नमः

509। ॐ धर्मस्थापनसंभवाय नमः

510। ॐ धुमालेउपासनीपत्न्यो निर्वाणे सद्गतिप्रदाय नमः

511। ॐ धूपखेडा पटेल् चांद्भाय् नष्टाश्व स्थानसूचकाय नमः

512। ॐ धूमयान पतत्पाथेवारपत्नी सुरक्षकाय नमः

513। ॐ ध्यानावस्थितचेतसे नमः

514। ॐ धृत्युत्साहसमन्विताय नमः

515। ॐ नतजनावनाय नमः

516। ॐ नरलोकमनोरमाय नमः

517। ॐ नष्टदृष्टिप्रदात्रे नमः

518। ॐ नरलोकविडंबनाय नमः

519। ॐ नागसर्पे मयूरे च समारूढ षडाननाय नमः

520। ॐ नानाचांदोर्कमाहूय तत्सद्गत्यै कृतोद्यमाय नमः

521। ॐ नानानिम्होण्करस्यांते स्वांघ्रि ध्यानलयप्रदाय नमः

522। ॐ नानादेशाभिधाकाराय नमः

523। ॐ नानाविधिसमर्चिताय नमः

524। ॐ नारायणमहाराजसंश्लाघितपदांबुजाय नमः

525। ॐ नारायणपराय नमः

526। ॐ नामवर्जिताय नमः

527। ॐ निगृहितेंद्रियग्रामाय नमः

528। ॐ निगमागमगोचराय नमः

529। ॐ नित्यसर्वगतस्थाणवे नमः

530। ॐ नित्यतृप्ताय नमः

531। ॐ निराश्रयाय नमः

532। ॐ नित्यान्नदानधर्मिष्ठाय नमः

533। ॐ नित्यानंदप्रवाहकाय नमः

534। ॐ नित्यमंगळधाम्ने नमः

535। ॐ नित्याग्निहोत्रवर्धनाय नमः

536। ॐ नित्यकर्मनियोक्त्रे नमः

537। ॐ नित्यसत्त्वस्थिताय नमः

538। ॐ निंबपादपमूलस्थाय नमः

539। ॐ निरंतराग्निरक्षित्रे नमः

540। ॐ निस्पृहाय नमः

541। ॐ निर्विकल्पाय नमः

542। ॐ निरंकुशगतागतये नमः

543। ॐ निर्जितकामनादोषाय नमः

544। ॐ निराशाय नमः

545। ॐ निरंजनाय नमः

546। ॐ निर्विकल्पसमाधिस्थाय नमः

547। ॐ निरपेक्षाय नमः

548। ॐ निर्गुणाय नमः

549। ॐ निर्द्वंद्वाय नमः

550। ॐ नित्यसत्त्वस्थाय नमः

551। ॐ निर्विकाराय नमः

552। ॐ निश्चलाय नमः

553। ॐ निरालंबाय नमः

554। ॐ निराकाराय नमः

555। ॐ निवृत्तगुणदोषकाय नमः

556। ॐ नूल्कर विजयानंद माहिषां गतिदायकाय नमः

557। ॐ नरसिंह गणूदास दत्त प्रचारसाधनाय नमः

558। ॐ नैष्ठिकब्रह्मचर्याय नमः

559। ॐ नैष्कर्म्यपरिनिष्ठिताय नमः

560। ॐ पंडरीपांडुरंगाख्याय नमः

561। ॐ पाटिल् तात्याजी मातुलाय नमः

562। ॐ पतितपावनाय नमः

563। ॐ पत्रिग्रामसमुद्भवाय नमः

564। ॐ पदविसृष्टगंगांभसे नमः

565। ॐ पदांबुजनतावनाय नमः

566। ॐ परब्रह्मस्वरूपिणे नमः

567। ॐ परमकरुणालयाय नमः

568। ॐ परतत्त्वप्रदीपाय नमः

569। ॐ परमार्थनिवेदकाय नमः

570। ॐ परमानंदनिस्यंदाय नमः

571। ॐ परंज्योतिषे नमः

572। ॐ परात्पराय नमः

573। ॐ परमेष्ठिने नमः

574। ॐ परंधाम्ने नमः

575। ॐ परमेश्वराय नमः

576। ॐ परमसद्गुरवे नमः

577। ॐ परमाचार्याय नमः

578। ॐ परधर्मभयाद्भक्तान् स्वे स्वे धर्मे नियोजकाय नमः

579। ॐ परार्थैकांतसंभूतये नमः

580। ॐ परमात्मने नमः

581। ॐ परागतये नमः

582। ॐ पापतापौघसंहारिणे नमः

583। ॐ पामरव्याजपंडिताय नमः

584। ॐ पापाद्दासं समाकृष्य पुण्यमार्ग प्रवर्तकाय नमः

585। ॐ पिपीलिकासुखान्नदाय नमः

586। ॐ पिशाचेश्च व्यवस्थिताय नमः

587। ॐ पुत्रकामेष्टि यागादे ऋते संतानवर्धनाय नमः

588। ॐ पुनरुज्जीवितप्रेताय नमः

589। ॐ पुनरावृत्तिनाशकाय नमः

590। ॐ पुनः पुनरिहागम्य भक्तेभ्यः सद्गतिप्रदाय नमः

591। ॐ पुंडरीकायताक्षाय नमः

592। ॐ पुण्यश्रवणकीर्तनाय नमः

593। ॐ पुरंदरादिभक्ताग्र्यपरित्राणधुरंधराय नमः

594। ॐ पुराणपुरुषाय नमः

595। ॐ पुरीशाय नमः

596। ॐ पुरुषोत्तमाय नमः

597। ॐ पूजापराङ्मुखाय नमः

598। ॐ पूर्णाय नमः

599। ॐ पूर्णवैराग्यशोभिताय नमः

600। ॐ पूर्णानंदस्वरूपिणे नमः

601। ॐ पूर्णकृपानिधये नमः

602। ॐ पूर्णचंद्रसमाह्लादिने नमः

603। ॐ पूर्णकामाय नमः

604। ॐ पूर्वजाय नमः

605। ॐ प्रणतपालनोद्युक्ताय नमः

606। ॐ प्रणतार्तिहराय नमः

607। ॐ प्रत्यक्षदेवतामूर्तये नमः

608। ॐ प्रत्यगात्मनिदर्शकाय नमः

609। ॐ प्रपन्नपारिजाताय नमः

610। ॐ प्रपन्नानां परागतये नमः

611। ॐ प्रमाणातीतचिन्मूर्तये नमः

612। ॐ प्रमादाभिधमृत्युजिते नमः

613। ॐ प्रसन्नवदनाय नमः

614। ॐ प्रसादाभिमुखद्युतये नमः

615। ॐ प्रशस्तवाचे नमः

616। ॐ प्रशांतात्मने नमः

617। ॐ प्रियसत्यमुदाहरते नमः

618। ॐ प्रेमदाय नमः

619। ॐ प्रेमवश्याय नमः

620। ॐ प्रेममार्गैकसाधनाय नमः

621। ॐ बहुरूपनिगूढात्मने नमः

622। ॐ बलदृप्तदमक्षमाय नमः

623। ॐ बलातिदर्पभय्याजि महागर्वविभंजनाय नमः

624। ॐ बुधसंतोषदाय नमः

625। ॐ बुद्धाय नमः

626। ॐ बुधजनावनाय नमः

627। ॐ बृहद्बंधविमोक्त्रे नमः

628। ॐ बृहद्भारवहक्षमाय नमः

629। ॐ ब्रह्मकुलसमुद्भूताय नमः

630। ॐ ब्रह्मचारिव्रतस्थिताय नमः

631। ॐ ब्रह्मानंदामृतेमग्नाय नमः

632। ॐ ब्रह्मानंदाय नमः

633। ॐ ब्रह्मानंदलसद्दृष्टये नमः

634। ॐ ब्रह्मवादिने नमः

635। ॐ बृहच्छ्रवसे नमः

636। ॐ ब्राह्मणस्त्रीविसृष्टोल्कातर्जितश्वाकृतये नमः

637। ॐ ब्राह्मणानां मशीदिस्थाय नमः

638। ॐ ब्रह्मण्याय नमः

639। ॐ ब्रह्मवित्तमाय नमः

640। ॐ भक्तदासगणूप्राणमानवृत्त्यादिरक्षकाय नमः

641। ॐ भक्तात्यंतहितैषिणे नमः

642। ॐ भक्ताश्रितदयापराय नमः

643। ॐ भक्तार्थे धृतदेहाय नमः

644। ॐ भक्तार्थे दग्धहस्तकाय नमः

645। ॐ भक्तपरागतये नमः

646। ॐ भक्तवत्सलाय नमः

647। ॐ भक्तमानसवासिने नमः

648। ॐ भक्तातिसुलभाय नमः

649। ॐ भक्तभवाब्धिपोताय नमः

650। ॐ भगवते नमः

651। ॐ भजतां सुहृदे नमः

652। ॐ भक्तसर्वस्वहारिणे नमः

653। ॐ भक्तानुग्रहकातराय नमः

654। ॐ भक्तरास्न्यादि सर्वेषां अमोघाभयसंप्रदाय नमः

655। ॐ भक्तावनसमर्थाय नमः

656। ॐ भक्तावनधुरंधराय नमः

657। ॐ भक्तभावपराधीनाय नमः

658। ॐ भक्तात्यंतहितौषधाय नमः

659। ॐ भक्तावनप्रतिज्ञाय नमः

660। ॐ भजतामिष्टकामधुहे नमः

661। ॐ भक्तहृत्पद्मवासिने नमः

662। ॐ भक्तिमार्गप्रदर्शकाय नमः

663। ॐ भक्ताशयविहारिणे नमः

664। ॐ भक्तसर्वमलापहाय नमः

665। ॐ भक्तबोधैकनिष्ठाय नमः

666। ॐ भक्तानां सद्गतिप्रदाय नमः

667। ॐ भद्रमार्गप्रदर्शिने नमः

668। ॐ भद्रं भद्रमिति ब्रुवते नमः

669। ॐ भद्रश्रवसे नमः

670। ॐ भन्नूमायि साध्वीमहितशासनाय नमः

671। ॐ भयसंत्रस्त कापर्दे अमोघाभयवरप्रदाय नमः

672। ॐ भयहीनाय नमः

673। ॐ भयत्रात्रे नमः

674। ॐ भयकृते नमः

675। ॐ भयनाशनाय नमः

676। ॐ भववारिधिपोताय नमः

677। ॐ भवलुंठनकोविदाय नमः

678। ॐ भस्मदाननिरस्ताधिव्याधिदुःखाऽशुभाऽखिलाय नमः

679। ॐ भस्मसात्कृतभक्तारये नमः

680। ॐ भस्मसात्कृतमन्मथाय नमः

681। ॐ भस्मपूतमशीदिस्थाय नमः

682। ॐ भस्मदग्धाखिलामयाय नमः

683। ॐ भागोजि कुष्ठरोगघ्नाय नमः

684। ॐ भाषाखिलसुवेदिताय नमः

685। ॐ भाष्यकृते नमः

686। ॐ भावगम्याय नमः

687। ॐ भारसर्वपरिग्रहाय नमः

688। ॐ भागवतसहायाय नमः

689। ॐ भावना शून्यतः सुखिने नमः

690। ॐ भागवतप्रधानाय नमः

691। ॐ भागवतोत्तमाय नमः

692। ॐ भाटेद्वेषं समाकृष्य भक्तिं तस्मै प्रदत्तवते नमः

693। ॐ भिल्लरूपेण दत्तांभसे नमः

694। ॐ भिक्षान्नदानशेषभुजे नमः

695। ॐ भिक्षाधर्ममहाराजाय नमः

696। ॐ भिक्षौघदत्तभोजनाय नमः

697। ॐ भीमाजी क्षयपापघ्ने नमः

698। ॐ भीमबलान्विताय नमः

699। ॐ भीतानां भीतिनाशिने नमः

700। ॐ भीषणभीषणाय नमः

701। ॐ भीषाचालितसुर्याग्निमघवन्मृत्युमारुताय नमः

702। ॐ भुक्तिमुक्तिप्रदात्रे नमः

703। ॐ भुजगाद्रक्षितप्रजाय नमः

704। ॐ भुजंगरूपमाविश्य सहस्रजनपूजिताय नमः

705। ॐ भुक्त्वा भोजनदातृणां दग्धप्रागुत्तराऽशुभाय नमः

706। ॐ भूटिद्वारा गृहं बद्ध्वा कृतसर्वमतालयाय नमः

707। ॐ भूभृत्समोपकारिणे नमः

708। ॐ भूम्ने नमः

709। ॐ भूशयाय नमः

710। ॐ भूतशरण्यभूताय नमः

711। ॐ भूतात्मने नमः

712। ॐ भूतभावनाय नमः

713। ॐ भूतप्रेतपिशाचादीन् धर्ममार्गे नियोजयते नमः

714। ॐ भृत्यस्यभृत्यसेवाकृते नमः

715। ॐ भृत्यभारवहाय नमः

716। ॐ भेकं दत्त वरं स्मृत्वा सर्पस्यादपि रक्षकाय नमः

717। ॐ भोगैश्वर्येष्वसक्तात्मने नमः

718। ॐ भैषज्येभिषजां वराय नमः

719। ॐ मर्करूपेण भक्तस्य रक्षणे तेन ताडिताय नमः

720। ॐ मंत्रघोषमशीदिस्थाय नमः

721। ॐ मदाभिमानवर्जिताय नमः

722। ॐ मधुपानभृशासक्तिं दिव्यशक्त्य व्यपोहकाय नमः

723। ॐ मशीध्यां तुलसीपूजां अग्निहोत्रं च शासकाय नमः

724। ॐ महावाक्यसुधामग्नाय नमः

725। ॐ महाभागवताय नमः

726। ॐ महानुभावतेजस्विने नमः

727। ॐ महायोगेश्वराय नमः

728। ॐ महाभयपरित्रात्रे नमः

729। ॐ महात्मने नमः

730। ॐ महाबलाय नमः

731। ॐ माधवरायदेशपांडे सख्युः साहाय्यकृते नमः

732। ॐ मानापमानयोस्तुल्याय नमः

733। ॐ मार्गबंधवे नमः

734। ॐ मारुतये नमः

735। ॐ मायामानुष रूपेण गूढैश्वर्यपरात्पराय नमः

736। ॐ मार्गस्थदेवसत्कारः कार्य इत्यनुशासित्रे नमः

737। ॐ मारीग्रस्थ बूटीत्रात्रे नमः

738। ॐ मार्जालोच्छिष्ठभोजनाय नमः

739। ॐ मिरीकरं सर्पगंडात् दैवाज्ञाप्ताद्विमोचयते नमः

740। ॐ मितवाचे नमः

741। ॐ मितभुजे नमः

742। ॐ मित्रेशत्रौसदासमाय नमः

743। ॐ मीनातायी प्रसूत्यर्थं प्रेषिताय रथं ददते नमः

744। ॐ मुक्तसंग आनंवादिने नमः

745। ॐ मुक्तसंसृतिबंधनाय नमः

746। ॐ मुहुर्देवावतारादि नामोच्चारण निवृताय नमः

747। ॐ मूर्तिपूजानुशास्त्रे नमः

748। ॐ मूर्तिमानप्यमूर्तिमते नमः

749। ॐ मूलेशास्त्री गुरोर्घोलप महाराजस्य रूपधृते नमः

750। ॐ मृतसूनुं समाकृष्य पूर्वमातरि योजयते नमः

751। ॐ मृदालयनिवासिने नमः

752। ॐ मृत्युभीतिव्यपोहकाय नमः

753। ॐ मेघश्यामायपूजार्थं शिवलिंगमुपाहरते नमः

754। ॐ मोहकलिलतीर्णाय नमः

755। ॐ मोहसंशयनाशकाय नमः

756। ॐ मोहिनीराजपूजायां कुल्कर्ण्यप्पा नियोजकाय नमः

757। ॐ मोक्षमार्गसहायाय नमः

758। ॐ मौनव्याख्याप्रबोधकाय नमः

759। ॐ यज्ञदानतपोनिष्ठाय नमः

760। ॐ यज्ञशिष्टान्नभोजनाय नमः

761। ॐ यतींद्रियमनोबुद्धये नमः

762। ॐ यतिधर्मसुपालकाय नमः

763। ॐ यतो वाचो निवर्तंते तदानंद सुनिष्ठिताय नमः

764। ॐ यत्नातिशयसेवाप्त गुरुपूर्णकृपाबलाय नमः

765। ॐ यथेच्छसूक्ष्मसंचारिणे नमः

766। ॐ यथेष्टदानधर्मकृते नमः

767। ॐ यंत्रारूढं जगत्सर्वं मायया भ्रामयत्प्रभवे नमः

768। ॐ यमकिंकरसंत्रस्त सामंतस्य सहायकृते नमः

769। ॐ यमदूतपरिक्लिष्टपुरंदरसुरक्षकाय नमः

770। ॐ यमभीतिविनाशिने नमः

771। ॐ यवनालयभूषणाय नमः

772। ॐ यशसापिमहाराजाय नमः

773। ॐ यशःपूरितभारताय नमः

774। ॐ यक्षरक्षःपिशाचानां सान्निध्यादेवनाशकाय नमः

775। ॐ युक्तभोजननिद्राय नमः

776। ॐ युगांतरचरित्रविदे नमः

777। ॐ योगशक्तिजितस्वप्नाय नमः

778। ॐ योगमायासमावृताय नमः

779। ॐ योगवीक्षणसंदत्तपरमानंदमूर्तिमते नमः

780। ॐ योगिभिर्ध्यानगम्याय नमः

781। ॐ योगक्षेमवहाय नमः

782। ॐ रथस्य रजताश्वेषु हृतेष्वम्लान मानसाय नमः

783। ॐ रसाय नमः

784। ॐ रससारज्ञाय नमः

785। ॐ रसनारसजिते नमः

786। ॐ रसोप्यस्य परं दृष्ट्वा निवर्तित महायशसे नमः

787। ॐ रक्षणात्पोषणात् सर्वपितृमातृगुरुप्रभवे नमः

788। ॐ रागद्वेषवियुक्तात्मने नमः

789। ॐ राकाचंद्रसमाननाय नमः

790। ॐ राजीवलोचनाय नमः

791। ॐ राजभिश्चाभिवंदिताय नमः

792। ॐ रामभक्तिप्रपूर्णाय नमः

793। ॐ रामरूपप्रदर्शकाय नमः

794। ॐ रामसारूप्यलब्धाय नमः

795। ॐ रामसायीति विश्रुताय नमः

796। ॐ रामदूतमयाय नमः

797। ॐ राममंत्रोपदेशकाय नमः

798। ॐ राममूर्त्यादिशंकर्त्रे नमः

799। ॐ रासनेकुलवर्धनाय नमः

800। ॐ रुद्रतुल्यप्रकोपाय नमः

801। ॐ रुद्रकोपदमक्षमाय नमः

802। ॐ रुद्रविष्णुकृताभेदाय नमः

803। ॐ रूपिणीरूप्यमोहजिते नमः

804। ॐ रूपेरूपे चिदात्मानं पश्यध्वमिति बोधकाय नमः

805। ॐ रूपाद्रूपांतरं यातोऽमृत इत्यभयप्रदाय नमः

806। ॐ रेगे शिशोः तथांधस्य सतां गति विधायकाय नमः

807। ॐ रोगदारिद्र्यदुःखादीन् भस्मदानेन वारयते नमः

808। ॐ रोदनातार्द्रचित्ताय नमः

809। ॐ रोमहर्षादवाकृतये नमः

810। ॐ लघ्वाशिने नमः

811। ॐ लघुनिद्राय नमः

812। ॐ लब्धाश्वग्रामणिस्तुताय नमः

813। ॐ लगुडोद्धृतरोहिल्लास्तंभनाद्दर्पनाशकाय नमः

814। ॐ ललिताद्भुतचारित्राय नमः

815। ॐ लक्ष्मीनारायणाय नमः

816। ॐ लीलामानुषदेहस्थाय नमः

817। ॐ लीलामानुषकर्मकृते नमः

818। ॐ लेलेशास्त्रि श्रुतिप्रीत्या मशीदि वेदघोषणाय नमः

819। ॐ लोकाभिरामाय नमः

820। ॐ लोकेशाय नमः

821। ॐ लोलुपत्वविवर्जिताय नमः

822। ॐ लोकेषु विहरंश्चापि सच्चिदानंदसंस्थिताय नमः

823। ॐ लोणिवार्ण्यगणूदासं महापायाद्विमोचकाय नमः

824। ॐ वस्त्रवद्वपुरुद्वीक्ष्य स्वेच्छत्यक्तकलेबराय नमः

825। ॐ वस्त्रवद्देहमुत्सृज्य पुनर्देहं प्रविष्टवते नमः

826। ॐ वंध्यादोषविमुक्त्यर्थं तद्वस्त्रे नारिकेलदाय नमः

827। ॐ वासुदेवैकसंतुष्टये नमः

828। ॐ वादद्वेषमदायाऽप्रियाय नमः

829। ॐ विद्याविनयसंपन्नाय नमः

830। ॐ विधेयात्मने नमः

831। ॐ वीर्यवते नमः

832। ॐ विविक्तदेशसेविने नमः

833। ॐ विश्वभावनभाविताय नमः

834। ॐ विश्वमंगळमांगळ्याय नमः

835। ॐ विषयात् संहृतेंद्रियाय नमः

836। ॐ वीतरागभयक्रोधाय नमः

837। ॐ वृद्धांधेक्षणसंप्रदाय नमः

838। ॐ वेदांतांबुजसूर्याय नमः

839। ॐ वेदिस्थाग्निविवर्धनाय नमः

840। ॐ वैराग्यपूर्णचारित्राय नमः

841। ॐ वैकुंठप्रियकर्मकृते नमः

842। ॐ वैहायसगतये नमः

843। ॐ व्यामोहप्रशमौषधाय नमः

844। ॐ शत्रुच्छेदैकमंत्राय नमः

845। ॐ शरणागतवत्सलाय नमः

846। ॐ शरणागतभीमाजीश्वांधभेकादिरक्षकाय नमः

847। ॐ शरीरस्थाशरीरस्थाय नमः

848। ॐ शरीरानेकसंभृताय नमः

849। ॐ शश्वत्परार्थसर्वेहाय नमः

850। ॐ शरीरकर्मकेवलाय नमः

851। ॐ शाश्वतधर्मगोप्त्रे नमः

852। ॐ शांतिदांतिविभूषिताय नमः

853। ॐ शिरस्तंभितगंगांभसे नमः

854। ॐ शांताकाराय नमः

855। ॐ शिष्टधर्ममनुप्राप्य मौलाना पादसेविताय नमः

856। ॐ शिवदाय नमः

857। ॐ शिवरूपाय नमः

858। ॐ शिवशक्तियुताय नमः

859। ॐ शिरीयानसुतोद्वाहं यथोक्तं परिपूरयते नमः

860। ॐ शीतोष्णसुखदुःखेषु समाय नमः

861। ॐ शीतलवाक्सुधाय नमः

862। ॐ शिर्डिन्यस्तगुरोर्देहाय नमः

863। ॐ शिर्डित्यक्तकलेबराय नमः

864। ॐ शुक्लांबरधराय नमः

865। ॐ शुद्धसत्त्वगुणस्थिताय नमः

866। ॐ शुद्धज्ञानस्वरूपाय नमः

867। ॐ शुभाशुभविवर्जिताय नमः

868। ॐ शुभ्रमार्गेण नेता नॄन् तद्विष्णोः परमं पदाय नमः

869। ॐ शेलुगुरुकुलेवासिने नमः

870। ॐ शेषशायिने नमः

871। ॐ श्रीकंठाय नमः

872। ॐ श्रीकराय नमः

873। ॐ श्रीमते नमः

874। ॐ श्रेष्ठाय नमः

875। ॐ श्रेयोविधायकाय नमः

876। ॐ श्रुतिस्मृतिशिरोरत्नविभूषितपदांबुजाय नमः

877। ॐ श्रेयान् स्वधर्म इत्युक्त्वा स्वेस्वेधर्मनियोजकाय नमः

878। ॐ सखारामसशिष्याय नमः

879। ॐ सकलाश्रयकामदुहे नमः

880। ॐ सगुणोनिर्गुणाय नमः

881। ॐ सच्चिदानंदमूर्तिमते नमः

882। ॐ सज्जनमानसव्योमराजमानसुधाकराय नमः

883। ॐ सत्कर्मनिरताय नमः

884। ॐ सत्संतानवरप्रदाय नमः

885। ॐ सत्यव्रताय नमः

886। ॐ सत्याय नमः

887। ॐ सत्सुलभोऽन्यदुर्लभाय नमः

888। ॐ सत्यवाचे नमः

889। ॐ सत्यसंकल्पाय नमः

890। ॐ सत्यधर्मपरायणाय नमः

891। ॐ सत्यपराक्रमाय नमः

892। ॐ सत्यद्रष्ट्रे नमः

893। ॐ सनातनाय नमः

894। ॐ सत्यनारायणाय नमः

895। ॐ सत्यतत्त्वप्रबोधकाय नमः

896। ॐ सत्पुरुषाय नमः

897। ॐ सदाचाराय नमः

898। ॐ सदापरहितेरताय नमः

899। ॐ सदाक्षिप्तनिजानंदाय नमः

900। ॐ सदानंदाय नमः

901। ॐ सद्गुरवे नमः

902। ॐ सदाजनहितोद्युक्ताय नमः

903। ॐ सदात्मने नमः

904। ॐ सदाशिवाय नमः

905। ॐ सदार्द्रचित्ताय नमः

906। ॐ सद्रूपिणे नमः

907। ॐ सदाश्रयाय नमः

908। ॐ सदाजिताय नमः

909। ॐ सन्यासयोगयुक्तात्मने नमः

910। ॐ सन्मार्गस्थापनव्रताय नमः

911। ॐ सबीजं फलमादाय निर्बीजं परिणामकाय नमः

912। ॐ समदुःखसुखस्वस्थाय नमः

913। ॐ समलोष्टाश्मकांचनाय नमः

914। ॐ समर्थसद्गुरुश्रेष्ठाय नमः

915। ॐ समानरहिताय नमः

916। ॐ समाश्रितजनत्राणव्रतपालनतत्पराय नमः

917। ॐ समुद्रसमगांभीर्याय नमः

918। ॐ संकल्परहिताय नमः

919। ॐ संसारतापहार्यंघ्रये नमः

920। ॐ संसारवर्जिताय नमः

921। ॐ संसारोत्तारनाम्ने नमः

922। ॐ सरोजदळकोमलाय नमः

923। ॐ सर्पादिभयहारिणे नमः

924। ॐ सर्परूपेप्यवस्थिताय नमः

925। ॐ सर्वकर्मफलत्यागिने नमः

926। ॐ सर्वत्रसमवस्थिताय नमः

927। ॐ सर्वतःपाणिपादाय नमः

928। ॐ सर्वतोऽक्षिशिरोमुखाय नमः

929। ॐ सर्वतःश्रुतिमन्मूर्तये नमः

930। ॐ सर्वमावृत्यसंस्थिताय नमः

931। ॐ सर्वधर्मसमत्रात्रे नमः

932। ॐ सर्वधर्मसुपूजिताय नमः

933। ॐ सर्वधर्मान् परित्यज्य गुर्वीशं शरणं गताय नमः

934। ॐ सर्वधीसाक्षिभूताय नमः

935। ॐ सर्वनामाभिसूचिताय नमः

936। ॐ सर्वभूतांतरात्मने नमः

937। ॐ सर्वभूताशयस्थिताय नमः

938। ॐ सर्वभूतादिवासाय नमः

939। ॐ सर्वभूतहितेरताय नमः

940। ॐ सर्वभूतात्मभूतात्मने नमः

941। ॐ सर्वभूतसुहृदे नमः

942। ॐ सर्वभूतनिशोन्निद्राय नमः

943। ॐ सर्वभूतसमादृताय नमः

944। ॐ सर्वज्ञाय नमः

945। ॐ सर्वविदे नमः

946। ॐ सर्वस्मै नमः

947। ॐ सर्वमतसुसम्मताय नमः

948। ॐ सर्वब्रह्ममयं द्रष्ट्रे नमः

949। ॐ सर्वशक्त्युपबृंहिताय नमः

950। ॐ सर्वसंकल्पसन्यासिने नमः

951। ॐ सर्वसंगविवर्जिताय नमः

952। ॐ सर्वलोकशरण्याय नमः

953। ॐ सर्वलोकमहेश्वराय नमः

954। ॐ सर्वेशाय नमः

955। ॐ सर्वरूपिणे नमः

956। ॐ सर्वशत्रुनिबर्हणाय नमः

957। ॐ सर्वैश्वर्यैकमंत्राय नमः

958। ॐ सर्वेप्सितफलप्रदाय नमः

959। ॐ सर्वोपकारकारिणे नमः

960। ॐ सर्वोपास्यपदांबुजाय नमः

961। ॐ सहस्रशिर्षमूर्तये नमः

962। ॐ सहस्राक्षाय नमः

963। ॐ सहस्रपदे नमः

964। ॐ सहस्रनामसुश्लाघिने नमः

965। ॐ सहस्रनामलक्षिताय नमः

966। ॐ साकारोपि निराकाराय नमः

967। ॐ साकारार्चासुमानिताय नमः

968। ॐ साधुजनपरित्रात्रे नमः

969। ॐ साधुपोषकस्तथैवाय नमः

970। ॐ सायीति सज्जानैः प्रोक्तः सायीदेवाय नमः

971। ॐ सायीरामाय नमः

972। ॐ सायिनाथाय नमः

973। ॐ सायीशाय नमः

974। ॐ सायिसत्तमाय नमः

975। ॐ सालोक्यसार्ष्टिसामीप्यसायुज्यपददायकाय नमः

976। ॐ साक्षात्कृतहरिप्रीत्या सर्वशक्तियुताय नमः

977। ॐ साक्षात्कारप्रदात्रे नमः

978। ॐ साक्षान्मन्मथमर्दनाय नमः

979। ॐ सिद्धेशाय नमः

980। ॐ सिद्धसंकल्पाय नमः

981। ॐ सिद्धिदाय नमः

982। ॐ सिद्धवाङ्मुखाय नमः

983। ॐ सुकृतदुष्कृतातीताय नमः

984। ॐ सुखेषुविगतस्पृहाय नमः

985। ॐ सुखदुःखसमाय नमः

986। ॐ सुधास्यंदिमुखोज्वलाय नमः

987। ॐ स्वेच्छामात्रजडद्देहाय नमः

988। ॐ स्वेच्छोपात्ततनवे नमः

989। ॐ स्वीकृतभक्तरोगाय नमः

990। ॐ स्वेमहिम्निप्रतिष्ठिताय नमः

991। ॐ हरिसाठे तथा नानां कामादेः परिरक्षकाय नमः

992। ॐ हर्षामर्षभयोद्वेगैर्निर्मुक्तविमलाशयाय नमः

993। ॐ हिंदुमुस्लिंसमूहानां मैत्रीकरणतत्पराय नमः

994। ॐ हूंकारेणैव सुक्षिप्रं स्तब्धप्रचंडमारुताय नमः

995। ॐ हृदयग्रंथिभेदिने नमः

996। ॐ हृदयग्रंथिवर्जिताय नमः

997। ॐ क्षांतानंतदौर्जन्याय नमः

998। ॐ क्षितिपालादिसेविताय नमः

999। ॐ क्षिप्रप्रसाददात्रे नमः

1000। ॐ क्षेत्रीकृतस्वशिर्डिकाय नमः ||इति श्री सायि सहस्रनामावळिः||